श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ ऐश्वर्यस्तबकः दशमः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ ऐश्वर्यस्तबकः दशमः ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वम्भरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः ॥ 10.1 ॥

अनुपाधिकमम्ब ते मुरारेः
अपि साधारणमाहुरीशितृत्वम्।
स्फुटमत्र निदर्शनं प्रतीमो
ननु मित्रावरुणादि देवतात्वम् ॥ 10.2 ॥

अविशेषमशेष शेषिभावं
युवयोर्यद्यपि वर्णयन्ति सन्तः।
तनये जलधेर्मिथः प्रतीतः
तदपि स्वामिनि शेषशेषिभावः ॥ 10.3 ॥

तुल्येऽपि ते नाथविशेषणत्वे
व्यक्तं गुणादस्ति विशेष एषः।
प्रत्यक्त्वमब्धेः तनये भवत्याः
प्राज्ञा गुणानां च पराक्त्वमाहुः ॥ 10.4 ॥

संसाराब्धौ मज्जतां सज्जनानां
रक्षायज्ञे दीक्षितो राक्षसारिः।
अम्भोराशेः पुत्रि पत्न्यास्तवासा -
वन्वारभ्भं नित्यमेत्यम्बुजाक्षः ॥ 10.5 ॥

अस्येशानेत्यागमस्तावदास्ताम्
    ऐश्वर्येऽस्मिन्नस्मदम्ब त्वदीये।
जागर्त्येव व्यासतातप्रणीतं
    श्लाघ्यं विष्णोस्तत् पुराणं प्रमाणम्॥ **10.6** ॥

जल्पाकास्ते जीवकोटि प्रवेशं
    स्वल्पप्रज्ञा ये रमे कल्पयन्ति।
विश्वं व्याप्तं विष्णुनाम्ब त्वया चे -
    त्युक्तिस्तान् प्रत्युत्तरं शक्तिसूनोः॥ **10.7** ॥

वेदोद्याने पारिजातायमानं
    श्रीसूक्तं तज्जायतां श्रेयसे नः।
पारेवाचां भासुरे त्वत्प्रभावे
    चक्षुष्मन्तो देवि येनैव सन्तः॥ **10.8** ॥

दम्पत्योरिह युवयोरधीश्वरत्वं
    व्यासज्ज्य स्थितिमिति सङ्गतं मतं नः।
विश्वाम्ब श्रुतिकथितं विहाय पत्नीं
    कर्तृत्वं क्रतुषु न केवलस्य पुंसः॥ **10.9** ॥

दत्ताशयासु भवतीमहिमोपदेशे
    तत्तादृशीषु निगमान्त सरस्वतीषु।
नारायणप्रियतमे निखिलाभ्युपेतं
    रामायणं ननु जयत्युपबृंहणं नः॥ **10.10** ॥

एकग्रीवैर्निगमशिखरैरिन्दिरे निर्विशेषं
    विश्वव्याप्तिर्जननि युवयोर्व्यक्तमुद्घुष्यमाणा।
ज्ञानद्वारा तव मधुरिपोरात्मनैवेत्यलीका
    वैषम्योक्तिः कुत उपनता हन्त केषाञ्चिदेषा॥ **10.11** ॥

वैभवं तव मुकुन्दपत्नि यो
    वेद वेदशिखरानुवर्णितम्।
वैभवं भुवि स विन्दति स्थिरं
    दुस्त्यजं त्यजति वै भवं ततः॥ **10.12** ॥

ऐश्वर्यमत्र मधुहन्तुरपह्नुते यो
    यो वा तवापि जगदम्ब तयोरुदीच्यः।
प्राच्यात् प्रदुष्यति विशिष्य पितृद्विषोऽपि
    मातृद्विषस्त्रिभुवने महती हि गर्हा॥ **10.13** ॥

श्रीमद् रामावरजसरणिं श्रेयसीमाश्रितानाम्
    आचार्याणामपि च कुहचिद् यस्तवाणुत्ववादः।
तस्याकूतं परमपुरुषापेक्षया तेऽब्धिकन्ये
    शेषत्वेन स्वत उपनत न्यूनतायां प्रतीमः॥ **10.14** ॥

राजन्वन्ति जगौ जगन्ति निगमो द्वाभ्यां युवाभ्यामपि
    द्वैराज्यं न हि तावता प्रसजति क्षीराम्बुधेरात्मजे।
आग्नावैष्णव शब्दभाजि यजनेऽधिष्ठानयुग्माश्रिताम्
    एकामेव हि देवतां सुमनसः शंसन्ति मीमांसकाः॥ **10.15** ॥

रामाकारे जनकतनया रुक्मिणी कृष्णरूपे
    भर्तुः कृष्णाजिनमुपगता ब्रह्मचर्येऽपि पद्मे।
अन्तर्यन्तुः सकलजगतामच्युतादच्युतां त्वं
    धत्से मूर्तिं तदिह युवयोः प्रस्फुटो नित्ययोगः॥ **10.16** ॥

पदव्यां भव्यायां कृतरुचिरमार्गं परिहरन्
    अकम्पं विस्रम्भं विदधदभिरक्षेदयमिति।
व्यवस्यन् गोप्तृत्वं व्यपसरदुपायान्तरकथः
    भवत्या संश्लिष्टे भगवति निदध्यान्निजभरम्॥ **10.17** ॥

न्यासक्रिया करणमन्त्र पदानुरोधात्
    उद्देश्यमात्महविषि स्वयमर्प्यमाणे।
वाराशिपुत्रि भवती विशिनष्टि नाथं
    यागे महेन्द्रमखिलाम्ब यथा महत्त्वम्॥ **10.18**॥

इच्छार्जित बहुदेहामिन्द्रादि पदप्रदावलोकलवाम्।
ईशानां भुवनानामीडीमहि नियतमिन्दिरे भवतीम्॥ **10.19**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे ऐश्वर्यस्तबकः दशमः॥